Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 2 | ISSN : 2582-0095

# भारतीयसंस्कृते मानवाधिकारचिन्तनम्



**Dr. Ekkurti Venkateswarlu**
Assistant Professor in Education,
Sri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha,
New Delhi , India.

---

**शोधालेखसारः** – भारतीयप्रशासन-जीवनव्यवस्था सनातनी, सदातनी च वर्तते। अतैवोच्यते -

**एतत्देशप्रसूतस्य सकादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।**

इति उक्त्यनुसारम् अयमेव देशः अन्येभ्यः देशेभ्यः सर्वविधविद्याः अददात्। अतः बहवो विषयाः भारते एव उपलभ्यन्ते इत्यत्र नास्ति संशयः लेशोऽपि। विशिष्यमानवस्य अधिकाराः भारतीयप्राचीनसंस्कृते बहुत्र प्रोक्ताः वर्तन्ते। तत्रापि समानता-सौभ्रत्रम्-स्वेच्छा-न्यायादि मानवाधिकाराः संस्कृते बहुदा निरूपिताः वर्तन्ते। अत्र मानवेभ्यः उपदिष्टाः स्वेच्छा-समानता-न्याय-सौभ्रत्रादयः सर्वेभ्यः अपि सामानाः इति तु सुस्पष्टं ज्ञायते। अतः मानवेभ्यः संस्कृतेन यदुक्तं तत् सर्वं सदुद्देशेनैव उक्तम्। परन्तु अनवबुध्या मानवाः एव उच्चनीचभावान् प्रदर्शयन्ति। तान् उच्चनीचभावान् अपनेतुं सर्वेभ्यः मानवेभ्यः प्राचीनार्वाचीनसंविधानाभ्यां समानाधिकाराः उपकल्पिताः वर्तन्ते, मे मतिः।

**मुख्यशब्दः** – समानाधिकारः,भारतीयः, संस्कृतिः, जनः, धर्मः।

---

भास्वरेऽस्मिन् संसारे अनन्तजीवराशि: वर्तते। अत्र प्रत्येकं जीवस्यापि स्वजीवनशैल्यनुसारं जीवितुं केचन अधिकारा: भवन्ति, भवेयु: च । तश्च जीवानां समान्यो धर्म: भवति। अर्थात् पक्षिण: स्वेच्छया आकाशे उड्डीयेरन्, मृगा: अरण्ये स्वेच्छया स्वजीवनं कुर्यु:, जले जलचरा: सुखं जीवेयु:, एवमेव कृमिकीटका: स्वजीवनं स्वप्रकृत्यनुगुणमेव कुर्यु:। अन्यथा जीवस्य विकासक्रम: कुण्ठित: भवेत् । तथैव मानवोऽपि समाजे स्वजीवनधर्मानुसारं जीवनं यापयितुं शक्नोति । स च मानवस्य सामान्यो धर्म: भवति। परन्तु सृष्टौ भूमण्डलैव बलवान् अबलं हीनदृट्या पश्यति, वञ्चयति, मारयति च। इयं दुस्थिति: अन्यजीवेषु अपि वर्तते। परं ते जीवा अज्ञानिन: भवन्ति। परन्तु बुद्धिमान्, सर्वज्ञ:, सर्वशासक:, पालक:, ज्ञानदाता, नियमकर्ता च इति व्यवह्रियमान: मानव एकैव मनुष्येषु तरतमभावं प्रदर्शयति। तेन मानवेषु मानाभिमानानि विनष्टानि भवन्ति। उच्चनीचतमभावा: च जायन्ते। तथा मनुष्येषु भेदाभिप्राया: संजायन्ते। तान् भेदान् निवारयितुमेव मावनवेभ्य: केचन अधिकारा: नितरामपेक्षन्ते। अधिकारास्तु मानावानां सामान्यधर्मा: भवन्ति। एते अधिकारास्तु वेदारभ्य संविधानपर्यन्तमपि सन्दर्भानुसारं प्रोक्ता: दृश्यन्ये। अधिकारा: तत्तत् समकालीनसमाजाय प्रोक्ता: दृश्यन्ते। तर्हि को नाम मानवाधिकार: इति ज्ञानजिज्ञासा वर्तते।

**मानवाधिकार:**

1. मानवस्य अधिकारा: मानवाधिकारा:। अधिकारो नाम सदुपयोगवानेव न तु दुरुपयोगवान्।
2. मानवाधिकार: मनुष्यस्य स्वभावप्रकृत्यनुसारं भवति।
3. अधिकारा: न सन्ति तर्हि मानवस्य रक्षणं नैव भवति।
4. शान्तिपूर्णजीवनाय अधिकारा: अपेक्षन्ते।
5. सम्पूर्णव्यक्ते: व्यक्तित्वनिर्माणाय अधिकारा: भवेयु:।
6. अधिकारा: मानवं न्यायालयात् अपि रक्ष्यन्ते।
7. अधिकारा: जन्मन: एव प्राप्यन्ते। अधिकारा: सर्वेषां भवन्ति न तु केषाञ्चन।
8. मानवाधिकारा: नाम परस्परभक्षका: न , अपि च परस्पररक्षका: भवन्ति।
9. मानवाधिकारस्य प्रकृति:

10.प्रत्येकं मानव: चेतनायुक्त:, विवेकि च भवति।

11.विना भेदभावं जीवितुम् इच्छति ।

12.जीवनरक्षा-स्वेच्छां च इच्छति।

13.दासत्वात्/दासजीवनात् च उन्मुक्तिमिच्छति।

14.अमानवीयकताया: दूरीकरणम्।

15.य: कोऽपि कुत्रापि जीवितुमधिकार:।

16.प्रत्येकं मानव: राष्ट्रियतां प्राप्तुमधिकार: वर्तते।

17.धनमार्जयितुमधिकार:वर्तते।

18.स्वविचारान्, धर्मान् च आनुसर्तुमधिकार: वर्तते।

19.प्रत्येकं जनाय समानातां प्राप्तुमधिार: वर्तते।

20.प्रत्येकं जन: स्वेच्छया शिक्षां प्राप्तुमधिकार: वर्तते।

21.प्रत्येकं जन: सामाजिकसुरक्षां प्राप्तुमधिकार अस्ति।

22.कोऽपि कामपि वृत्तिं कृत्वा जीवितुम् अधिकार: वर्तते।

23.इमे सवेऽपि अधिकारा: भारतीयसंविधाने उल्लिखितानि वर्तन्ते।

**भारतीयसंविधाने प्रधाना: मानवाधिकारा:**

भारतीयसंविधानेन मानवेभ्य: बहवो अधिकारा: कल्पिता: वर्तन्ते। यथा वैयक्तिकप्रतिष्ठाया: कृते आदरभावप्रदर्शनम्, सर्वेषां कृते समानावकाशप्रकल्पनम्, तथैव स्वेच्छा, सुहृद्भाव:, तथा च सहकारात्मकं जीवनम्, उत्तमनागरिकत्वम्, सहनशीलता, परिवर्तनविषये विश्वासप्रदर्शनम्, प्रशान्तमयमार्गानां विषये विश्वासप्रदर्शनम् इत्यादि, अत: आहत्य प्रजातन्त्रे मानवस्य चत्वार: प्रधानाधिकारा: (चतुस्सूत्रिका) भवन्ति। इमे च अधिकारा: सर्वेभ्य: मानवेभ्य: समाना: विद्यन्ते। वेदोऽखिलो धर्ममूलम् इति सूक्त्या एवमपि ऊहितुं शक्यते यत् भारतीयसंविधाने ये मानवाधिकारा: उल्लिखिता: सन्ति। तादृशा एव मानवाधिकारा: वेदभगवींतादि

भारतीयप्राचीनसंस्कृते (प्राचीनसंविधाने) अपि प्रसङ्गानुसारम् उल्लिखिता: दृश्यन्ते इति नास्ति लेशमात्रोऽपि संशय:। यथा

**१. स्वातन्त्र्यम्। ( वाक्-धर्म-भाषा-वस्त्र-भोजन-निवास-संस्कृति: इत्यादय:)**

**२. समानता। ( सर्वेषु जीवनसम्बद्धेषु विषयेषु )**

**३. सौभ्रत्रम्। ( परस्परसोदरसोदरीभाव: )**

**४. न्याय:। ( सर्वेभ्य: समानन्याय:)**

इमे अधिकारा: भारतीयप्राचीनसंस्कृतवाङ्मये बहुषु ग्रन्थेषु उपनिबद्धा: वर्तन्ते। तेषं दिङ्मात्रविवरणमत्र प्रस्तूयते।

**भारतीयप्राचीनसंस्कृते मानवाधिकारा:**

**समानताया: अधिकार:**

सर्वेऽपि मानवा: संविधानदृष्ट्या समाना: भवन्ति। नकेवलं संविधाने अपि च भारतीयप्राचीनसंस्कृतवाङ्मयेऽपि समानाताधिकारविषयकं चिन्तनं वेदादिषु दृश्यते। यथा -

**एकता**

**देवस्त्वष्टा सविता विश्वरूप: पुपोष प्रजा: पुरुधा जजना।**

**इमा च विश्वा भुवनान्यस्य महद् देवानामसुरत्वमेकम्।।** (ऋ.३.५५.१९)

इदं तावत् मूलभूतं तत्त्वं भवति यत् जगत् सर्वं वसुधैव कुटुम्बकम् इति एकताया: भावना मानवेषु स्यात् अन्यथा असमानता, अन्याय:, अधर्म:, असंतोष: च अवशिष्यन्ते इति अस्य मन्त्रस्य भाव: भवति।

**सं गच्छध्वं सं वदध्वम्। सं वो मनासिं जानताम्** ( ऋ.१०.२९१.२)

You should walk together, talk together, and think alike.असमानता भवति तत्र तु मिलित्वा गमनं, मिलित्वा सम्भाषणं, मिलित्वा चिन्तनं कथं भवितुमर्हति। अत: एकता सम्पादनीया मानवै: इति मन्त्रभाव: भवति।

**समानो अध्वा प्रवतामनुष्यदे** ( ऋ.२.१३.२)

सर्वेषां जीवनमार्ग: समान: भवति। यदा जीवनमार्ग: समान: तदा सर्वेभ्य: मानवेभ्य: तस्मिन् मार्गे गन्तुं समानाधिकार: भवतीति। अर्थात् प्रत्येकं मानवस्य भिन्नमार्ग: भवितुं नार्हति इति वेद: उल्लिखति।

**वयं राष्ट्रे जागृयाम पुरोहिता:** ( वा.सं.९.२३)

अस्मिन् मन्त्रे वयं सर्वेऽपि मिलित्वा अस्माकं राष्ट्रं विश्वगुरुस्थानं नयाम: इति या भावना अत्र प्रतिपादिता सा समानताया: सूचक: भवति। एवञ्च राष्ट्रेकातां च सूचयति।

**समानो मन्त्र: समिति: समानी, समानं मन: सह चित्तमेषाम्।**

**समानं मन्त्रमभिमन्त्रये व: समानेन वो हविषा जुहोमि।।** (ऋ.१०.१९१.३)

मन्त्रे अस्मिन् सर्वेऽपि मानवा: स्वयमेवं समानाताया: विषये चिन्तयेयु: इति मन्त्रभाव: भवति। अर्थात् समानता, सद्भावना, एकता, सर्वेभ्योऽपि समानावश्यकतानां पूर्ति:, समाजहितचिन्तनम् इति अत्र वर्णिततम् वर्तते।

**समानी व आकूति: समाना हृदयानि व:।**

**समानमस्तु वो मनो यथा व: सुसहासति।।**( ऋ.१०.१९१.४)

सर्वेषु विषयेषु समानताम् उल्लिखति ऋक्संहिता यथा अन्ने, पाने, चिन्तने, सहजीवने, सर्वत्रापि समानतां पश्य इति, समस्तं समानमिति भावं मन्त्र: प्रकटयति।

**आर्थिकदृष्ट्या समानता**

**देहि मे ददामि ते न मे धेहि नि ते दधे।**

**निहारं च हरासि मे निहारं नि हराणि ते।।** (यजु.३.५०)

अत्र आर्थिकसमानाताम् आनेतुं सर्वै: परस्परम् आदानप्रदानम् कुर्यु:। अर्थात् सहाय्यं कर्तव्यमिति भावनां प्रकटयति। आधुनिके काले आय: अधिक: भवति चेत् बलि: (टाक्स्) दातव्य: भवति। तेन निर्धनेभ्य: तत् धनेन सहाय्यं क्रियते। अस्मिन् मन्त्रेऽपि नर्मगर्भतया आदानप्रदानेन आर्थिकसमानाताम् आनेतुं शक्यते इति वेद: निगदति।

**समदर्शिन:**

**विद्याविनयसंपन्ने ब्रह्मणे गवि हस्तिनि।**

**शुनि चैव श्वापाके च पण्डित: समदर्शिन:।।** (गीता. ५-१८)

Sages look with an equal eye upon a learned and humble Brahman on a cow, on an elephant, and even on a dog and a vile person.अत्र अयमर्थ: व्यनक्ति यत् पण्डित: नाम सर्वेषु समानातां य: पश्यति सैव पण्डित: इति, इतरे सर्वेषु असमानतामेव पश्यति स: न। अर्थात् सर्वे समाना: भवन्ति, परं सर्वेषु समानाताया: चिन्तनम् तु मनुष्यस्य दृष्ट्यनुगुणं भवतीति वक्तुमलम्। अपि च गीतायामेव भगवान् श्रीकृष्ण: वदति यत् सृष्टौ सर्वेषु अहमेव अस्मि मत्त: भिन्ना: न सन्तीति। अत: भगवत: सर्वे समाना: खलु कुतो मानवेषु असमानता इति श्लोकस्य भावार्थ: भवति।

**अद्वेष्टा सर्वभूतानां मैत्र: करुण एव च ।**

**निर्ममो निरहंकार: समदु:खसुख:क्षमी।।** (गीता. १२.१३)

He who hates no creature, who is friendly and compassionate to all, who is free attachment and egoism, balanced in pleasure and pain, and forgiving.सर्वकालेषु, सर्वावस्थासु, सर्वेषु च य: निरहंकारेण समानतां पश्यति सैव अद्वैति अर्थात् समानभावयुक्त: भवतीति भगवत: गिर:।

**सहनाववतु सहनौभुनक्तु सहवीर्यं करवावहै ।**

**तेजश्विनावधीतमस्तु मा विद्विषावहै।।** ( तैत्त.आ ७.२ )

अत्र वसुधायां मया सह य: जीवति, मिलित्वा अस्नाति तस्मै वीर्यं, बलं, प्रकाशं च ददातु एकस्मै अपि न द्विषामि। यत: सर्वे मया सह समाना: एव इति अस्य मन्त्रस्य भावार्थ: भवति। अत: अस्मिन्नपि मन्त्रे समानाताया: विषये उक्तं वर्तते।

**अयं निज: परो वेति गणना लघुचेतसाम्।**

**उदारचरितानां तु वसुधैव कुटुम्बकम्।।** (हितो.)

Consideration like ‘he is mine or he is another’s occur only to the narrow minded persons. To the broad-minded persons the whole world is a family. नारायणपण्डित: समानताविषये द्विधा मानवा: भवन्तीति उल्लिखति यथा - येषु मानवेषु उदारभावना भवति, ते मानवा: अन्यमानवेषु सर्वेषु अपि समानतां पश्यन्तीति प्रतिपादयति। येषु मानवेषु अयं अस्मदीय:, अयं तस्मदीय: इति भावना भवति ते सर्वे असमानतां पश्यन्तीति भाव:। अत: असमानतां दूरीकर्तुं सर्वेषु मानवेषु वसुधैवकुटुम्बकम् इति भावना स्यात् इति श्लोकभाव:।

**सौभ्रत्रम् :-** सौभ्रत्रम् इति गुण: मानवाधिकारेषु अन्यतम: भवति। अस्य गुणस्य तत्त्वानि भवन्ति यत् परस्परपरोपकारभाव:, सोदरभाव:, रक्षणभाव: इत्यादि।

**रक्षणम् :-पुमान् पुमांसं परिपातु विश्वत:** (ऋ.६.७५.२४)

मानविकता नरेषु भवति, अत: वयं सर्वेऽपि मानवा: इति व्यवह्रीयमाणा: स्म:। अत: अस्मासु परस्परं रक्षणभाव: स्यात्, सर्वस्मात्, सर्वदा, सर्वत्र च परस्परं रक्षयेम। इतीमे भावा: यत्र भवन्ति, तश्च भवति सौभ्रत्रम् इति।

**सोदरभाव: :- अज्येष्ठासो अकनिष्ठास एते सं भ्रतरो वावृध: सौभगाय।**(वही.५.६०.५)

समाजे सर्वेऽपि व्यक्तिन: सोदरभावेन जीवनं कुयुरिति परमार्थत: भाव:, अत्र सर्वेषु ज्येष्ठेषु कनिष्ठेषु च भातृभावना स्यादिति तेन लोककल्याणं जायतेति मन्त्रार्थ:।

**मैत्रिभाव::-मित्रस्य चक्षुषा समीक्षामहे।** ( यजु.३६.१८)

वयं सर्वेऽपि परस्परं स्नेहभावनया सर्वान् पश्याम: इति मन्त्रार्थ: भवति। यत्र मैत्रिभावना भवति तत्रैव सौभ्रत्रमपि भवति। अत: सर्वेषु मानवेषु मित्रदृष्टि: स्यात् इति मन्त्रभाव:। अपि च -

**सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:।**

**सर्वे भद्राणि पश्यन्तु मा कश्चित् दु:खभाक् भवेत्।।** ( तैत्त.)

प्राचीनभारते जनानां चिन्तनमेवम् आसीत् एकस्यापि दु:खं न भवेत्। अर्थात् सर्वेऽपि जना: सुखिन: भवन्तु इति या भावना वर्तते सा सौभ्रत्रभावनैव इति वक्तुमलम्।

**मनुष्येषु देवत्वम्**

**नमो महद्भ्यो नमो अर्भकेभ्यो**

**नमो युवेभ्यो नम आशिनेभ्यो** ( ऋ.१.२७.१३)

केवलं भरतराष्ट्रे एव मानव: मानवे देवत्वं पश्यति, नान्ये देशे । इदमेव समानताया: प्रमाणं भवति। न केवलं मानवेषु मानवत्वम् अपि च देवत्वमपि प्रतिपादयति अयं मन्त्र:।

**स्वेच्छा**

**वाक्शुद्धि:** :-

**घृतात् स्वादीयो मधुनश्च वोचत।** (ऋ.८.२४.२०)

अस्माभि: यानि वाक्यानि उच्यन्ते तानि मधुघृतयो: अपेक्षया मधुराणि स्यु: इति भाव:। अर्थात् मानस्य वाक्स्वातन्त्र्यम् विद्यतेति हेतो: मानव: स्वभाषणेन अन्येभ्य: हिंसां न जनयेत्, अपि च प्रेम्णा, मृधभाषणेन च मानवस्य व्यवहार: स्यात् इति भावार्थ:। अपि च –

**मधुमतीं वाचं वदतु शान्तिवाम्** ( अथर्व.३.३०.२)

अर्थात् मधुरै: वचोभि: सर्वेभ्य: शुभसूचकानि वाक्यान्येव वदतु, सर्वेषु शान्तिमेव पश्य इति मन्त्रमुपदिशति। मानवा: मनसा, वाचा, कर्मणा वा हिंसां न कुर्यु: इति भावना वर्तते। अपि च

**संभाषमाण: प्रियो है व भवति।** ( शां. आ. ४.४)

मानवेभ्य: स्वेच्छा इति कश्चन अधिकार: वर्तते। तथापि यदेच्छं नैव सम्भाषेत, अपि च प्रियं भाषणं कुर्यात् इति, तेन सर्वे जन्तव: अपि तुष्यन्तीति भाव:। अपि च -

**ऊर्जा मधुमती वाक्** ( अर्थवे. १६.२.१)

अस्माकं वाणी प्रकाशयुक्ता, प्रभावी, मधुरयुक्ता च स्यात, तथैव अर्थयुक्ता, प्रिया च स्यात् तेन मानवस्य वाक्स्वेच्छा इति अधिकार: रक्षित: भवति।

**न्याय:** :- मानवस्य अधिकारेषु अन्यतम: भवति न्याय: इति। अस्मिन् विषये आधुनिकप्रपञ्चे सर्वत्र अन्याय: एव दृश्यते न तु न्याय:। संस्कृतवाङ्मये तु न्यायविषये बहुत्र प्रोक्त: विद्यते। यथा -

**मा गृध: कस्यस्विद् धनम्।** ( ईशा.१)

अपरस्य कस्यापि धनं नैव अपहरेत्। अन्यथा दण्डार्हः भवतीत। यदि धनं स्वार्थाय एव उपयुज्यते अन्येभ्यः न दीयते तदपि अन्यायः इति । यथा-

**नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी।** ( ऋ.१०.११७.६)

अर्थात् यः धनं देवाय, मित्राय, न ददाति केवलं स्वोदरपूर्तेः एव स्वीकरोति सः अन्यायि भवतीति मन्त्रस्य निगूढार्थः वर्तते। अर्थात् अन्येभ्यः दानमपि न्याय एव इति मन्त्रार्थः अस्ति।

**सत्यमेव जयते नानृतम्।** (मुण्ड. ३.१.६)

अर्थात् यत्र सत्यं/न्यायः च भवति तत्रैव जयः भवति। अतः सर्वैः सत्यं/न्यायञ्च अनुसरणीयमिति।

**उपसंहारः**

भारतीयप्रशासन-जीवनव्यवस्था सनातनी, सदातनी च वर्तते। अतैवोच्यते -

**एतत्देशप्रसूतस्य सकादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।**

इति उक्त्यनुसारम् अयमेव देशः अन्येभ्यः देशेभ्यः सर्वविधविद्याः अददात्। अतः बहवो विषयाः भारते एव उपलभ्यन्ते इत्यत्र नास्ति संशयः लेशोऽपि। विशिष्यमानवस्य अधिकाराः भारतीयप्राचीनसंस्कृते बहुत्र प्रोक्ताः वर्तन्ते। तत्रापि समानता-सौभ्रत्रम्-स्वेच्छा-न्यायादि मानवाधिकाराः संस्कृते बहुदा निरूपिताः वर्तन्ते। अत्र मानवेभ्यः उपदिष्टाः स्वेच्छा-समानता-न्याय-सौभ्रत्रादयः सर्वेभ्यः अपि सामानाः इति तु सुस्पष्टं ज्ञायते। अतः मानवेभ्यः संस्कृतेन यदुक्तं तत् सर्वं सदुद्देशेनैव उक्तम्। परन्तु अनवबुध्या मानवाः एव उच्चनीचभावान् प्रदर्शयन्ति। तान् उच्चनीचभावान् अपनेतुं सर्वेभ्यः मानवेभ्यः प्राचीनार्वाचीनसंविधानाभ्यां समानाधिकाराः उपकल्पिताः वर्तन्ते, मे मतिः।

**सन्दर्भग्रन्थसूची**


1. सत्यार्थप्रकाशः - स्वामिदयानन्दसरस्वती।
2. वेद मे सामाजिक-नैतिक-शैक्षिकमूल्य।
3. भारतीय संस्कृति - डा.प्रीति प्रभा गोयल, राजस्थानी ग्रन्थागार, जोधपुर्।
4. भाषापरिच्छेदः - श्रीपञ्चाननशास्त्रा, चौखम्भाप्रकाशनम्, वारणासि।
5. वैदिकवाङ्मयविवेचनम् - डा.कृष्णलालः, जे.पि.पब्लिशिंग हाउस्, दिल्ली।
6. वेदों मे समाजशास्त्र अर्थशास्त्र और शिक्षाशास्त्र - डा.कपिलदेव द्विवेदी, विश्वभारती अनुसन्धान परिषद, ज्ञानपुर।
7. वैदिकशिक्षापद्धतिः - डा.भाष्यकरमिश्रः, महर्षिसान्दीपनि राष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्ययिनि, २००३।
8. शिक्षाशास्त्रम् (पाणिनिविरचित उदयनाचार्यभाष्यम्), रामलालकपूर् ट्रस्ट्र, हरियाणा।